1

137

श्रीगणेशाय नमः॥ [illegible]

॥ श्री गणेशाय नमः॥ [illegible]



[illegible]

भवन्नभवत ॥१०॥ मौशलं मुसलं कृत्वा कदनं [illegible] सुनिशितं ता ॥११॥

मौशले ते परिक्रान्ते [illegible] समन्वितः । विप्रशापं [illegible] केशवः [illegible] यावि-
यात ॥१२॥ इति श्रीमहाभारते मौशले पर्वणि प्रथमोध्यायः ॥१॥ जनमेजय उवाच ॥
कथं विनष्टा भगवन्नन्धका वृष्णिभिः सह । पश्यतो वासुदेवस्य [illegible] ॥१॥
वैशंपायन उवाच ॥ षट्त्रिंशेऽथ ततो वर्षे वृष्णीनामनयो महान् [illegible]
हि निर्जघ्नुः कालनोदिताः ॥२॥ जनमेजय उवाच ॥ केनानुशप्तास्ते [illegible] वृष्ण्यन्धका य-
काययुः ॥ भोजाश्च द्विजवर्य त्वं विस्तरेण [illegible] ॥३॥ वैशंपायन उवाच ॥ विश्वामि-
त्रं च कण्वं च नारदं च तपोधनं ॥ [illegible] ददृशुर्द्वारकागतान् ॥४॥ ते
वै साम्बं पुरस्कृत्य भूषयित्वा स्त्रियं यथा ॥ [illegible] दैवदण्डनिपीडिताः ॥५॥
इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः [illegible] किमियं जनयिष्यति
॥६॥ इत्युक्तास्ते तदा राजन्विप्रलम्भ[illegible] प्रत्यब्रुवंस्तान्मुनयो यत्तच्छृणु नरा-
धिप ॥७॥ मुनय ऊचुः ॥ वृष्ण्यन्धकविनाशाय मुसलं घोरमायसं । वासुदेवस्य दायादः
साम्बोऽयं जनयिष्यति ॥८॥ येन यूयं सुदुर्वृत्ता नृशंसा जातमन्यवः ॥ उच्छे-
त्तारः कुलं सर्वं [illegible] ॥९॥ समुद्रं यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः
जरा कृष्णं महात्मानं शयानं भुवि भेत्स्यति ॥१०॥ इत्यब्रुवन्त ते राजन् [illegible] दुरा-
त्मभिः ॥ मुनयः क्रोधरक्ताक्षाः समीक्ष्याथ परस्परं ॥११॥ तथोक्त्वा [illegible] ततः को

3